यम् अग्ने यज्ञम् उपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ॥ २.००२.११ ॥
उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश् च शर्मणि ।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ॥ २.००२.१२ ॥
ये स्तोतृभ्यो गोअग्राम् अश्वपेशसम् अग्ने रातिम् उपसृजन्ति सूरयः ।
अस्माञ् च तांश् च प्र हि नेषि वस्य आ बृहद् वदेम विदथे सुवीराः ॥ २.००२.१३ ॥

वैश्वानराय पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे ।
अग्निर् हि देवाँ अमृतो दुवस्यत्य् अथा धर्माणि सनता न दूदुषत् ॥ ३.००३.०१ ॥
अन्तर् दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।
क्षयम् बृहन्तम् परि भूषति द्युभिर् देवेभिर् अग्निर् इषितो धियावसुः ॥ ३.००३.०२ ॥
केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निम् महयन्त चित्तिभिः ।
अपांसि यस्मिन्न् अधि संदधुर् गिरस् तस्मिन् सुम्नानि यजमान आ चके ॥ ३.००३.०३ ॥
पिता यज्ञानाम् असुरो विपश्चिता विमानम् अग्निर् वयुनं च वाघताम् ।
आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ॥ ३.००३.०४ ॥
चन्द्रम् अग्निं चन्द्ररथं हरिव्रतं वैश्वानरम् अप्सुषदं स्वर्विदम् ।
विगाहं तूर्णिं तविषीभिर् आवृतम् भूर्णिं देवास इह सुश्रियं दधुः ॥ ३.००३.०५ ॥
अग्निर् देवेभिर् मनुषश् च जन्तुभिस् तन्वानो यज्ञम् पुरुपेशसं धिया ।
रथीर् अन्तर् ईयते साधदिष्टिभिर् जीरो दमूना अभिशस्तिचातनः ॥ ३.००३.०६ ॥
अग्ने जरस्व स्वपत्य आयुन्य् ऊर्जा पिन्वस्व सम् इषो दिदीहि नः ।
वयांसि जिन्व बृहतश् च जागृव उशिग् देवानाम् असि सुक्रतुर् विपाम् ॥ ३.००३.०७ ॥
विश्पतिं यह्वम् अतिथिं नरः सदा यन्तारं धीनाम् उशिजं च वाघताम् ।
अध्वराणां चेतनं जातवेदसम् प्र शंसन्ति नमसा जूतिभिर् वृधे ॥ ३.००३.०८ ॥
विभावा देवः सुरणः परि क्षितीर् अग्निर् बभूव शवसा सुमद्रथः ।
तस्य व्रतानि भूरिपोषिणो वयम् उप भूषेम दम आ सुवृक्तिभिः ॥ ३.००३.०९ ॥
वैश्वानर तव धामान्य् आ चके येभिः स्वर्विद् अभवो विचक्षण ।
जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूर् असि त्मना ॥ ३.००३.१० ॥
वैश्वानरस्य दंसनाभ्यो बृहद् अरिणाद् एकः स्वपस्यया कविः ।
उभा पितरा महयन्न् अजायताग्निर् द्यावापृथिवी भूरिरेतसा ॥ ३.००३.११ ॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीम् अनु प्रसितिं द्रूणानो ऽस्तासि विध्य रक्षसस् तपिष्ठैः ॥ ४.००४.०१ ॥
तव भ्रमास आशुया पतन्त्य् अनु स्पृश धृषता शोशुचानः ।
तपूंष्य् अग्ने जुह्वा पतंगान् असंदितो वि सृज विष्वग् उल्काः ॥ ४.००४.०२ ॥
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर् विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्य् अग्ने माकिष् टे व्यथिर् आ दधर्षीत् ॥ ४.००४.०३ ॥
उद् अग्ने तिष्ठ प्रत्य् आ तनुष्व न्य् अ १ मित्राँ ओषतात् तिग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्य् अतसं न शुष्कम् ॥ ४.००४.०४ ॥
ऊर्ध्वो भव प्रति विध्याध्य् अस्मद् आविष् कृणुष्व दैव्यान्य् अग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिम् अजामिम् प्र मृणीहि शत्रून् ॥ ४.००४.०५ ॥
स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुम् ऐरत् ।